'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours Part-III Examination, 2022

## SANSKRIT

## PAPER-V

## NEW AND OLD SYLLABUS

Time Allotted: 4 Hours　　　　Full Marks: 100

*The figures in the margin indicate full marks.*

### विभागः-क

1. <u>प्रश्नद्वयं</u> समाधेयम् (एकस्योत्तरं संस्कृतभाषया प्रदेयम्)– 10×2 = 20

(क) दण्डिकृतं महाकाव्यलक्षणं सविशदमालोचयत।

(ख) दण्डिमतानुसारेण काव्यकारणमालोचयत।

(ग) दण्डिनः मतानुसारेण काव्यं कतिविधम् ? सविस्तरम् आलोचयत।

(घ) व्याख्येयम् (द्वयोः)– 5×2 = 10

(i) तदल्पमपि नोपेक्षं काव्ये दुष्टं कथञ्चन।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥

(ii) कन्ये कामयमानं मां न त्वं कामयसे कथम्।
इति ग्राम्योयमर्थात्मा वैरस्याय प्रकल्पते॥

(iii) गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥

### विभागः-ख

2. <u>प्रश्नत्रयं</u> समाधेयम्– 10×3 = 30

(क) सलक्षणं सोदाहरणं च आलोच्यताम् (द्वयोः)– 5×2 = 10

विभावना, रूपकम्, उत्प्रेक्षा, भ्रान्तिमान्।

(ख) प्रभेदः निर्णयः (द्वयोः)– 5×2 = 10

(i) अनन्वय-व्यतिरेकयोः

(ii) उपमा-प्रतिवस्तूपमयोः

(iii) दीपक-तुल्ययोगितयोः

(iv) विशेषोक्ति-विभावनयोः

(ग) एकमलङ्कारमवलम्ब्य संक्षिप्तः प्रबन्धः लिख्यताम्– 10

अनुप्रासः, उपमा, अर्थान्तरन्यासः।

(घ) श्लोकार्थमालोच्य अलंकारः निर्णीयताम् (द्वयोः)– 5×2 = 10

(i) कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः।
धरणीव धृतिर्धतिरिव धरणी सततं विभाति वत यस्य॥

(ii) क्व वत हरिणकानां जीवितञ्चातिलोलम्।
क्व च निशितनिपाता वज्रसाराः शरास्ते॥

(iii) वारिजेनेव सरसी शशिनेब निशीथिनी।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा॥

(iv) क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम्।
विरम प्रसीद सुन्दरि! यौबनमनिवर्ति यातं तु॥

## विभागः-ग

3. <u>एकस्यो</u>त्तरं प्रदेयम्– 12

(क) कथं भट्टिकाव्यम् उदाहरणकाव्यमित्युच्यते ? आलोच्यताम्।

(ख) भट्टिकाव्यस्य द्वितीयसर्गमवलम्ब्य शरदृतोः विवरणं दीयताम्।

4. संस्कृतभाषया व्याख्या कार्या (एकस्य)– 8

(क) न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः॥

(ख) दत्तावधानं मधुलहिगीतौ प्रशान्तचेष्टं हरिणं जिघांसुः।
आकर्णयन्नुत्सुकहंनादान् लक्ष्ये समाधिं न दधे मृगावित्॥

5. मातृभाषया आङ्गलभाषया वा अनुवादः कार्यः (एकस्य) – 4

(क) हिरण्मर्या साललतेव जङ्गमा च्युता दिवः स्थानुरिवाचिरप्रभा।
शशाङ्ककान्तेरधिदेवताकृतिः सुता ददे तस्य सुताय मैथिली॥

(খ) तरङ्गसङ्गाच्चपलैः पलाशैज्वालाश्रियं सातिशयां दधन्ति।

सधूमदीप्ताग्निरुचीनि रेजुस्ताम्रोत्पलान्याकुलषट्पदानि॥

6. प्रश्नत्रयं समाधेयम् – 2×3 = 6

(क) विश्वामित्रेण रामाय के विदये प्रदत्ते ?

(ख) काकुत्स्थः कः ?

(ग) भट्टिकाव्यस्य नामान्तरं किम् ?

(घ) का आसीत् ताडका ? केन कथं सा हता ?

(ङ) गाधेयः कः ?

## विभागः-घ

7. प्रश्नद्वयं समाधेयम्। 10×2 = 20

(क) साहित्यदर्पणस्य रचयिता कः ? आलंकारिकरूपेण तस्य मूल्यायनं क्रियताम्। 10

(ख) संस्कृतालंकारशास्त्रे वामनस्य अवदानमालोचयत। 10

(ग) संस्कृतालंकारशास्त्रे भरतस्यावदानं आलोचयत। 10

(घ) टिप्पणी लेखनीया (द्वयोः) – 5×2 = 10

काव्यमीमांसा, दण्डी, भामहः, दशरूपकम्।

——×——